**दिनाङ्क :-28.02.2026**

**प्रात: - 06:55**

**अथ वार्ताः**

**प्रधानमन्त्री – विकसित-भारत-सम्मेलनम्**

प्रधानमन्त्री नरेन्द्रमोदी प्रोक्तवान्, यद् भारतेन विगत एकादश-वर्षेषु स्वस्य सामर्थ्यस्य परिचयः प्राप्तः वर्तते । तथा च सर्वकारः तस्य साकारीकरणाय अविरतं कार्यं कुर्वन् अस्ति । ह्यः नवदिल्लीनगरे आयोजितं विकसित-भारत-सम्मेलनं सम्बोधयन् श्रीमोदी अवदत्, यद् विश्वस्य विकसितदेशाः अपि भारतेन सह व्यापारवर्धनाय उत्सुकतां प्रदर्शयन्ति ।

**पीएम-एचपीवी टीका**

प्रधानमन्त्री नरेन्द्रमोदी अद्य राजस्थानस्य अजमेरनगरे षोडशसहस्रकोटितोऽपि अधिकमूल्यानाम् अनेक-विकास-परियोजनानां उद्घाटनम्, आधारशिला-स्थापनं च करिष्यति । अस्मिन्नवसरे प्रधानमन्त्री बालिकानां कृते राष्ट्रव्यापी HPV इति मानव-पैपिलोमा-वायरस-इत्यस्य टीकाकरणकार्यक्रमस्य आरम्भं अपि करिष्यति। कार्यक्रमस्य उद्देश्यं सर्वेषु राज्येषु, केन्द्रशासित-प्रदेशेषु च प्रतिवर्षं चतुर्दश-आयुर्वर्गस्य प्रायः एकम् दशमलव पञ्चदश कोटि-बालिकानां टीकाकरणं करणीयम् अस्ति । सर्वकारीय-स्वास्थ्यकेन्द्रेषु इयं टीका निःशुल्कं प्रदास्यते ।

**आइएमए-मोदी**

भारतीयचिकित्सासंघटनेन, सम्पूर्णे भारते चतुर्दश-वर्षाणां किशोरीणां कृते निःशुल्कं एच्.पी.वी.टीकाकरणं प्रदातुं सर्वकारेण कृत-निर्णयस्य स्वागतं कृतम् । प्रधानमन्त्रिणे नरेन्द्रमोदिने लिखिते पत्रे, संघटनेन उक्तं यत् एषः उपक्रमः गर्भाशयस्य कर्करोगस्य निवारणे योगदानं करिष्यति, भारते कोटिकोटिमहिलानां स्वास्थ्यस्य जीवनस्य च रक्षणं करिष्यति । अनेन प्रोक्तं यत्, राष्ट्रव्यापि-अष्टादश-शताधिक-स्थानीयशाखानां सहाय्येन भारतीयचिकित्सासंघटनम्, अस्याः राष्ट्रिययोजनायाः समर्थनार्थं पूर्णतया प्रतिबद्धः अस्ति ।

**प्रधानमन्त्री-गुजरात**

प्रधानमन्त्री श्रीनरेन्द्रमोदी अद्य गुजरातस्य यात्रां करिष्यति। अस्मिन्नवसरे प्रधानमन्त्री सनन्द-नगरे माइक्रोन-सेमिकण्डक्टर-टेक्नोलोजी-इण्डिया-प्राइवेट्-लिमिटेड्-इत्यस्य सेमिकण्डक्टर-योजन-परीक्षण-पैकेजिंग्-सुविधायाः उद्घाटनं करिष्यति । अस्याः परियोजनायाः कुलव्ययः द्वाविंशति-सहस्रतोऽप्यधिक-रूप्यकाणि वर्तन्ते । अस्मिन् अवसरे श्रीमोदी सभामपि सम्बोधयिष्यति ।

**गृहमन्त्री**

केन्द्रीय-गृहमन्त्री अमित-शाहः अद्य बिहारे, भारत-नेपाल-सीमासहितं अनेक-सीमा-सुरक्षा-परामर्शेण सम्बद्ध-उच्चस्तरीय-समीक्षायाः अध्यक्षतां करिष्यति । सूत्रानुसारं अस्याः समीक्षा-संगोष्ठ्याः उद्देश्यम्, सीमाप्रबन्धनस्य सुदृढीकरणम्,अवैधकार्याणां विरुद्धं सतर्कतावर्धनम्, अथ सीमाक्षेत्रसमीपे अवैधनिर्माणं, अवैधप्रवासः, अतिक्रमणं, अनधिकृतवित्तीयप्रवाहः इत्यादीनां चिन्तानां निवारणम् अपि वर्तते ।

**उपराष्ट्रपतिः-केरल**

उपराष्ट्रपतिः सी पी राधाकृष्णन अद्यारभ्य केरलस्य द्वि-दिवसीय यात्रायां भविष्यति। उपराष्ट्रपतिः स्वस्य यात्रायाः प्रथमदिने चङ्गनसेरी-नगरस्य सेण्ट्-बर्च-मन्स्-महाविद्यालयस्य शताब्दी-उत्सवस्य घटिकोत्सवस्य च शोभां वर्धयिष्यति ।

**सकल घरेलू उत्पाद वृद्धि**

प्रचलित-वित्तवर्षस्य तृतीय-त्रिमासे भारतीय अर्थव्यवस्थायां सप्त-दशमलव-अष्ट प्रतिशतम् वृद्धिः अभवत् । अस्मिन् वर्षे वास्तविक-जीडीपीवृद्धिः सप्त-दशमलव-षट् प्रतिशतम् भवतीति अनुमानितम् अस्ति, यद्धि विगतवर्षे सप्त-दशमलव-एकम् प्रतिशतम् आसीत् ।

**वैश्विक तकनीकी वस्त्र सम्मेलन**

वस्त्रमन्त्रालयः अद्यारभ्य दिनद्वयं हरियाणाराज्यस्य भिवानीनगरे वस्त्रविज्ञानप्रौद्योगिकीसंस्थायां वैश्विक-प्रौद्योगिकी-वस्त्रसम्मेलनस्य आयोजनं करिष्यति । राष्ट्रीय-प्रौद्योगिकी-वस्त्रमिशनस्य अन्तर्गतं आयोजितस्य अस्य द्विदिनात्मकस्य सम्मेलनस्य उद्देश्यं भवननिर्माणे, विमाने, पवनचक्रेषु, बुलेट-रेलयानेषु च प्रयुक्तानां समग्रवस्त्राणां भारतीयनिर्माणं निर्यातं च प्रवर्तयितुं वर्तते ।

**क्रिकेट्**

अन्ताराष्ट्रिय-पुरुष-विंशतिम्-प्रतिविंशतिः क्रिकेट-विश्वचषक-क्रीडायां अद्य पल्लेकेले अन्ताराष्ट्रिय-क्रिकेट-क्रीडाङ्गणे पाकिस्तानम् श्रीलङ्कादलं सम्मुखीकरिष्यति । सायं सप्तवादने इयं क्रीडा आरप्स्यते। ह्यः कोलम्बोनगरस्य आर.प्रेमदास-क्रीडाङ्गणे सुपर-अष्ट-समूह-द्वितीय-क्रीडायां इङ्ग्लैण्ड्-दलेन न्यूजीलैण्ड्-दलं चतुस्तोभकैः पराजितम् ।

**॥इति वार्ताः॥**